भूवादयो धातवः ॥ १ ॥ उपदेशेऽजनुनासिक इत् ॥२॥ हलन्त्यम् ॥३॥ न विभक्तौ तुस्माः॥४॥ आदिर्ञिटुडवः ॥५॥ षः प्रत्ययस्य ॥६॥ चुटू ॥७॥ लशकतद्धिते ॥८॥ अनुदात्तङित आत्मनेपदम् ॥ १२ ॥ भावकर्मणोः ॥१२॥ नेर्विशः ॥ १७ ॥ परिव्यवेभ्यः क्रियः ॥१८॥ विपराभ्यां जेः ॥ १९ ॥ समवप्रविभ्यः स्थः ॥ २२ ॥ उपान्मन्त्रकरणे ॥ २५ ॥ शदेः शितः ॥ ६० ॥ म्रियते र्लुङ्लिङोश्च ॥६१ ॥ पूर्ववत्सनः ॥ ६३ ॥ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥ ६३ ॥ भुजोऽनवने ॥ ६६ ॥ स्वारितञितः कर्त्रभिप्राये क्रियाफले ॥७२ ॥ णिचश्च ॥ ७४ ॥ शेषात्कर्तरि परस्मैपदम् ॥ ७८॥ व्यङ्परिभ्यो रमः ॥ ८३ ॥ वाक्यषः ॥ ९० ॥ द्युद्भ्यो लुङि ॥ ९१ ॥ इति तृतीयः पादः ॥ १११ ॥

अथ चतुर्थः पादः

आकडारादेका संज्ञा ॥१ ॥ विप्रतिषेधे परं कार्यम् ॥ २ ॥

यू स्त्र्याख्यौ नदी ॥३॥ नेयङुवङ् स्थानावस्त्री ॥४॥ वाऽमि ॥५॥ ङिति ह्रस्वश्च ॥६॥ शेषोध्यसखि ॥७॥ पतिः समास एव ॥८॥ ह्रस्वं लघु ॥ १० ॥ संयोगे गुरु ॥११॥ दीर्घञ्च ॥१२॥ यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् ॥१३॥ सुप्तिङन्तं पदम् १४ ॥ नः क्ये ॥१५॥ सिति च ॥ १६ ॥ स्वादिष्वसर्वनामस्थाने ॥१७॥ यचि भम् ॥१८॥ कारके ॥२३॥ ध्रुवमपायेऽपादानम् ॥२४॥ भीत्रार्थानां भयहेतुः ॥ २५ ॥ वारणार्थानामीप्सितः ॥२७॥ जनिकर्तुः प्रकृतिः ॥ ३० ॥ कर्मणा यमभिप्रैति स सम्प्रदानम् ॥३२॥ रुच्यर्थानां प्रीयमाणः ॥३३॥ धारेरुत्तमर्णः ॥ ३५ ॥ स्पृहेरीप्सितः ॥ ३६ ॥ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः ॥ ३७ ॥ साधकतमं करणम् ॥४२॥ आधारोऽधिकरणम् ४५ अधिशीङ्स्थासां कर्म ४६ उपान्वध्याङ्वसः ४८ कर्तुरीप्सिततमंकर्म ४९ अकथितञ्च ५१ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता सणौ ५२ स्वतंत्रः कर्ता ५४ तत्प्रयोजको हेतुश्च ५५ प्रागीश्वरान्निपाताः ५६ चादयोऽसत्वे ५७ प्रादयः ५८ उपसर्गाः क्रियायोगे ५९ गतिश्च ६० ऊर्यादिच्विडाचश्च ६१ ते प्राग्धातोः ८० कर्मप्रवचनीयाः ८३ अधिरीश्वरे ९७ लः परस्मैपदम् ९९ तङानावात्मनेपदम् १०० तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १०१ तान्येकवचनद्विवचनबहुवचनान्येकशः १०२ सुपः १०३ विभक्तिश्च १०४ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १०५ अस्मद्युत्तमः १०७ शेषे प्रथमः १०८ परः सन्निकर्षः संहिता १०९ विरामोऽवसानम् ११० इति प्रथमाध्याये तुरीयः पादः १६५ ।

अथ द्वितीयाध्याये प्रथमः पादः

समर्थः पदविधिः १ सुबामन्त्रिते पराङ्गवत्स्वरे २ प्राक्कडारात्समासः ३ सह सुपा ४ अव्ययीभावः ५ अव्ययं विभक्ति-

समीपसमृद्धिवृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु ६ तत्पुरुषः २२ द्विगुश्च २३ द्वितीयाऽऽश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २४ तृतीया तत्कृतार्थेन गुणवचनेन ३० कर्तृकरणे कृता बहुलम् ३२ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः ३६ पञ्चमी भयेन ३७ सप्तमी शौण्डैः ४० पूर्वकालिक सर्वजरत्पुराणनवकेवलासमानाधिकरणेन ४९ दिक्संख्ये संज्ञायाम् ५० तद्धितार्थोत्तरपदसमाहारेच ५१ संख्यापूर्वो द्विगुः ५२ उपमानानि सामान्यवचनैः ५५ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे ५६ विशेषणं विशेष्येण बहुलम् ५७ इति प्रथम पादः १८६ ।

अथ द्वितीयः पादः

नञ् ६ षष्ठी ८ कुगतिप्रादयः १८ उपपदमतिङ् १९ शेषो बहुव्रीहिः २३ अनेकमन्यपदार्थे २४ संख्याऽव्ययासन्नादूराधिकसंख्याः संख्येये २५ चार्थे द्वन्द्वः २९ उपसर्जनं पूर्वम् ३० राजदन्तादिषु परम् ३१ द्वन्द्वे घि ३२ अजाद्यदन्तम् ३२ अल्पाच्तरम् ३४ सप्तमीविशेषणे बहुव्रीहौ ३५ निष्ठा ३६ वाहिताग्न्यादिषु ३७ कडाराः कर्मधारये ३८ इति द्वितीयः पादः २०३ ।

अथ तृतीयः पादः

अनभिहिते १ कर्मणि द्वितीया २ अन्तरान्तरेण युक्ते ४ कालाध्वनोरत्यन्तसंयोगे ५ अपवर्गे तृतीया ६ चतुर्थी सम्प्रदाने १३ नमः स्वस्तिस्वाहास्वधाऽलंवषड्योगाच्च १६ कर्तृकरणयोस्तृतीया १८ सहयुक्तेऽप्रधाने १९ येनाङ्गविकारः २० षष्ठी हेतुप्रयोगे २६ अपादाने पञ्चमी २८ अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते २९ पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् ३२ दूरान्तिकार्थैर्योगे द्वितीया च ३५ सप्तम्यधिकरणे

च ३६ यस्य च भावेन भावलक्षणम् ३७ षष्ठी चानादरे ३८ यतश्च निर्धारणम् ४१ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे - प्रथमा ४६ सम्बोधने च ४७ एकवचनं सम्बुद्धिः ४९ षष्ठी शेषे ५० अधीगर्थदयेषां कर्मणि ५२ कर्तृकर्मणोः कृति ६५ न लोकाव्ययनिष्ठाखलर्थतृनाम् ६९ कृत्यानां कर्तरि वा ७१ इति तृतीयः पादः २३१

अथ चतुर्थः पादः

द्विगुरेकवचनम् १ द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम् २ स नपुंसकम् १७ अव्ययीभावश्च १८ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २६ रात्राह्नाहाः पुंसि २९ अर्धर्चाः पुंसि च ३१ इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ ३२ एतदस्त्रतसोस्त्रतसौचानुदात्तौ ३३ द्वितीयाटौस्वेनः ३४ आर्धधातुके ३५ अदो जग्धिर्ल्यप्ति किति ३६ लुङ्सनोर्घस्लृ ३७ लिट्यन्यतरस्याम् ४० हनो वध लिङि ४२ लुङि च ४३ इणो गा लुङि ४५ णौ गमिरबोधने ४६ सनि च ४७ इडश्च ४८ गाङ् लिटि ४९ विभाषा लुङ्लृङोः ५० अस्तेर्भूः ५२ ब्रुवो वचिः ५३ चक्षिङः ख्याञ् ५४ वा लिटि ५५ एयत्रियार्षञितो यूनि लुगणिञोः ५८ सुपो धातुप्रातपदिकयोः ७१ अदिप्रभृतिभ्यः शपः ७२ यङोऽचि च ७४ जुहोत्यादिभ्यः श्लुः ७५ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ७७ विभाषा घ्राधेट्शाच्छासः ७८ तनादिभ्यस्तथासोः ७९ आमः ८१ अव्ययादाप्सुपः ८२ नाव्ययीभावादतोऽम्त्वपञ्चम्याः ८३ तृतीयासप्तम्योर्बहुलम् ८४ लुटः प्रथमस्य डारौरसः ८५ इति द्वितीयाध्याये चतुर्थः पादः २७०

अथ तृतीयाऽध्याये प्रथमः पादः

प्रत्ययः १ + परश्च २ गुप्तिजकिद्भ्यः सन् ५ धातोः कर्मणः समानकर्तृकादिच्छायां वा ७ सुप आत्मनः क्यच् ८ काम्यच्च ९ उपमानादाचारे १० कर्तुः

क्यङ् सलोपश्च ११ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् २२ नित्यं कौटिल्ये गतौ २३ सत्यापपाशरूपवीणातूलश्लोक - सेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् २५ हेतुमति च २६ कण्ड्वादिभ्यो यक् २७ सनाद्यन्ता धातवः ३२ स्यतासी ललुटोः ३३ कास्प्रत्ययादाममन्त्रे लिटि ३५ इजादेश्च गुरुमतो ऽनृच्छः ३६ दयायासश्च ३७ उषविदजागृभ्योऽन्यतरस्याम् ३८ भीह्रीभृहुवां श्लुवच्च ३९ कृञ्चानुप्रयुज्यते लिटि ४० विदाङ्कुर्वन्त्वित्यन्यतरस्याम् ४१ च्लि लुङि ४३ च्लेःसिच् ४४ शल इगुपधादनिटः क्सः ४५ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ५२ अस्यतिवक्तिख्यातिभ्योऽङ् ५२ लिपिसिचिह्नश्च ५३ आत्मनेपदेष्वन्यतरस्याम् ५४ पुषादिद्युताद्यृलदितः परस्मैपदेषु ५५ सर्तिशास्त्यर्तिभ्यश्च ५६ इरितो वा जृस्तम्भुम्रुचुम्लुचुग्लुचुग्लुञ्चुश्विभ्यश्च ५८ चिण् ते पदः ६० दीपजनबुधपूरितायिप्यायिभ्यो - ऽन्यतरस्याम् ६१ चिण् भावकर्मणोः ६६ सार्वधातुके यक् ६७ कर्तरि शप् ६८ दिवादिभ्यः श्यन् ६९ वा भ्राशम्लाशभ्रमुक्रमुत्रसित्रुटिलषः ७२ स्वादिभ्यः श्नुः ७३ श्रुवः शृच ४७ तुदादिभ्यः शः ७७ रुधादिभ्यःश्नम् ७८ तनादि कृञ्भ्य उः ७९ क्रयादिभ्यः श्ना ८१ हलः श्नः शानज्झौ ८३ धातोः ९१ तत्रोपपदं सप्तमीस्थम् ९२ कृदतिङ् ९३ वा ऽसरूपोऽस्त्रियाम् ९४ कृत्याः ९५ तव्यत्तव्यानीयरः ९६ अचो यत् ९७ एतिस्तुशास्वृदृजुषः क्यप् १०९ ऋहलोर्ण्यत् १२४ ण्वुल्तृचौ १३३ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः १३४ इगुपधज्ञाप्रीकिरः कः १३५ आतश्चोपसर्गे १३६ इति प्रथमः पादः ३३० ।

अथ द्वितीयः पादः

कर्मण्यण् १ आतोऽनुपसर्गे कः ३ स्पृशोऽनुदके क्विन् ५८ त्यदादिषु दृशोऽनालोचने कञ्च

६० आतो मनिन्क्वनिव्वनिपश्च७४ अन्येभ्योऽपि दृश्यन्ते ७५ क्विप् च ७६ सुप्यजातौ णिनिस्ताच्छील्ये ७८ भूते ८४ सप्तम्यां जनेर्डः ९७ अन्येष्वपि दृश्यते १०१ निष्ठा १०२ लिटः कानज्वा १०६ क्वसुश्च १०७ लुङ् ११० अनद्यतने लङ्। परोक्षे लिट्। लट् स्मे ११८ वर्तमाने लट् १२३ लटः शतृशानचावप्रथमासमानाधिकरणे १२४ तौ सत् १२७ आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु १३४ सनाशंसभिक्ष उः १६८ भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् १७७ अन्येभ्योऽपि दृश्यते १७८ इति द्वितीयः पादः ३५६

अथ तृतीयः पादः

उणादयो बहुलम् १ भविष्यति गम्यादयः ३ तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् १० लट् शेषे च १३ लटः सद्वा १४ अनद्यतने लुट् १५ पदरुजविशस्पृशो घञ् १६ भावे १८ अकर्तरि च कारके संज्ञायाम् १९ एरच् ५६ ऋदोरप् ५७ ड्वितः क्तिः ८८ द्वितोऽथुच् ८९ उपसर्गे घोः किः ९२ कर्मण्यधिकरणे च ९३ स्त्रियां क्तिन् ९४ अ प्रत्ययात् १०२ गुरोश्च हलः १०३ षिद्भिदादिभ्योऽङ् १०४ ण्यासश्रन्थो युच् कृत्यल्युटो बहुलम् ११३ नपुंसके भावेक्तः ११४ ल्युट् च ११५ करणाधिकरणयोश्च ११७ पुंसि संज्ञायां घः प्रायेण १८ अवे तॄस्रोर्घञ् १२० हलश्च १२१ ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल् १२६ आतो युच् १२८ वर्तमानसामीप्ये वर्तमानवद्वा १३१ लिङ् निमित्ते लृङ् क्रियातिपत्तौ १३९ भूते च १४० हेतुहेतुमतोर्लिङ् १३५ विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्। प्रैषातिसर्गप्राप्तकालेषुकृत्याश्च। अर्हे कृत्यतृचश्च। आशिषि लिङ्लोटौ १७३ माङि लुङ् १७५ स्मोत्तरे लङ्च ७६ इति तृतीयः पादः।

—अथ चतुर्थः पादः—

अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा १८ समानकर्तृकयोः पूर्वकाले २१ आभीक्ष्ण्येणमुल् च २२ कर्तरि कृत । लः कर्मणि च भावे चाकर्मकेभ्यः ६९ तयोरेवकृत्यक्तखलर्थाः ७० तिप्तस्झिसिप्थस्थमिब्वस्मस्ताताञ्झथासाथान्ध्वमिड्वहिमहिङ् ७८ टित आत्मनेपदानां टेरे ७९ थासः से ८० लिटस्तझयोरेशिरेच् ८१ परस्मैपदानां णलतुसुस्थलथुसणल्वमा ८२ विदो लटो वा ब्रुवः पञ्चादित आहो ब्रुवः ८४ लोटो लङ्वत् ८५ एरुः ८६ सेर्ह्यपिच्च ८७ मेर्निः ८९ आमेतः ९० सब्राभ्यां वामौ ९१ आडुत्तमस्य पिच्च ९२ एत ऐ ९३ इतश्च लोपः परस्मैपदेषु ९७ स उत्तमस्य ९८ नित्यं ङितः ९९ इतश्च १०० तस्थस्थमिपां तान्तन्ताम: १०१ लिङः सीयुट् १०२ यासुट् परस्मैपदेषूदात्तो ङिच्च १०३ किदाशिषि १०४ झस्य रन् १०५ इटोऽत् १०६ सुट् तिथोः १०७ झेर्जुस् १०८ सिजभ्यस्तविदिभ्यश्च १०९ आतः ११० लङः शाकटायनस्यैव १११ तिङ् शित् सार्वधातुकम् ११२ आर्धधातुकं शेषः ११४ लिट् च ११५ लिङाशिषि ११६ इति तृतीयाध्याये चतुर्थः पादः ३४८

———

अथ चतुर्थाध्याये प्रथमः पादः

ङ्याप् प्रातपदिकात् १ स्वौजसमौट्च्छष्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस्ङसोसांङ्योस्सुप् २ स्त्रियाम् ३ अजाद्यतष्टाप् ४ ऋन्नेभ्यो ङीप् ५ उगितश्च ६ न षट्स्वस्रादिभ्यः १० मनः ११ अनुपसर्जनात् १४ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयपठकठञ्कञ्क्वरपः १५ वयसि प्रथमे २० द्विगोः २१ अन्यतो ङीष् ४० षिद्गौरादिभ्यश्च ४१ वोतो गुणवचनात् ४४ बह्वादिभ्यश्च ४५ पुंयोगादाख्यायाम् ४८ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणमानुक् ४९ ग्वाङ्गाच्चोपसर्जनादसंयोगोपधात् ५४ न क्रोडादिबह्वचः ५६ ऊङुतः ६६ उरूत्तरपदादौपम्ये ६९ वद्धिताः ७६ यूनस्तिः ७७ समर्थानां प्रथमाद्वा ८२ प्राग्दीव्यतोऽण्८३ तस्यापत्यम् ९२ अत इञ् ९५ स्त्रीभ्यो ढक् १२० इति प्रथमः पादः ॥४६७॥

अथ द्वितीयः पादः

तेन रक्तं रागात् १ नक्षत्रेण युक्तः कालः ३ सास्मिन् पौर्णमासीति संज्ञायाम् २१ साऽस्य देवता २४ तस्य समूहः ३७ तदधीते तद्वेद ५९ क्रतूक्थादिसूत्रान्ताट्ठक् ६० क्रमा दिभ्यो वुन् ६१ तदस्मिन्नस्तीतिदेशे तन्नाम्नि ६७ तेन निर्वृत्तम् ६८ तस्य निवासः ६९ अदूर भवश्च ७० ओरञ् ७१ शेषे ९२ राष्ट्रावारपाराद्घखौ ९३ग्रामाद्यखञौ ९४ दक्षिणापश्चात्पुरसस्त्यक् ९८ द्यु प्रागपागुदक्प्रतीचो यत् १०१ अव्ययात्त्यप् १०४ वृद्धाच्छः ११४ भवतष्ठक्छसौ ११५ इति द्वितीयः पादः ॥४८९॥

अथ तृतीयः पादः

युष्मदस्मदोरन्यतरस्यां खञ्च १ तस्मिन्नणि च युष्माकास्माकौ २ तवकममकावेकवचने ३ मध्यान्मः ८ कालाट्ठञ् ११ सायंचिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च २३ तत्र जातः २५ तत्र भवः ५३ तत आगतः ७४ सोऽस्य निवासः ८६ तेन प्रोक्तम् १०१ तस्येदम् १२० तस्य विकारः १३४ अवयवे च प्राण्यौषधिवृक्षेभ्यः १३५ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः १४३ गोश्च पुरीषे १४५ गोपयसोर्यत् १६० द्रोश्च १६१ इति तृतीयः पादः ५०७

अथ चतुर्थः पादः

प्राग्वहतेष्ठक् १ तेन दीव्यति खनति जयति जितम् २ तरति ५ चरति ८ संसृष्ट २२ तदस्य पण्यम् ५१ शिल्पम् ५ प्रहरणम् ५७ अस्ति नास्ति दिष्टं मतिः ६० शीलम् ६१ प्राग्घिताद्यत् ७५ तद्वहति रथयुगप्रासङ्गम् ७६ तत्र साधुः ९८ पथ्यतिथिवसतिस्वपतेर्ढञ् १०४ सभाया यः १०५ इति चतुर्थाध्याये तुरीयः पादः ॥५२३॥

अथ पञ्चमाऽध्याये प्रथमः पादः

प्राक् क्रीताच्छः १ हितम् ५ शरीरावयवाद्यत् ६ आत्मन विश्वजनभोगोत्तरपदात् खः ९ प्राग्वहतेष्ठञ् १८ पंक्तिविंशतित्रिंशच्त्वारिंशत्-पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् ५९ तदर्हति (ठञ्) ६३ दण्डादिभ्यो यः ६६ तेन तुल्यं क्रिया चेद्वतिः ११५ तत्र तस्येव ११६ तस्य भावस्त्वतलौ ११९ पृथ्वादिभ्य इमनिज्वा १२२ वर्णदृढादिभ्यः ष्यञ्च १२३ गुणवचनब्राह्मणादिभ्यः कर्मणि च १२४ सख्युर्यः १२६ पत्यन्तपुरोहितादिभ्यो यक् १२८ इति प्रथमः पादः ॥५३९॥

अथ द्वितीयः पादः

तेन वित्तश्चुञ्चुप्चणपौ २६ तदस्य सञ्जातं तारकादिभ्य इतच् ३६ प्रमाणे द्वयसज्दघ्नञ्मात्रचः ३७ यत्तदेतेभ्यः परिमाणे वतुप् ३९ किमिदंभ्यां वो घः ४० संख्या अवयवे तयप् ४२ द्वित्रिभ्यां त्रयस्यायज्वा ४३ तस्य पूरणे डट् ४८ नान्तादसंख्यादेर्मट् ४९ षट्कतिकतिपयचतुरां थुक् ५१ द्वेस्तीयः ५४ त्रेः सम्प्रसारणञ्च ५५ तदस्यास्त्यस्मिन्निति मतुप् ९४ अत इनिठनौ ११५ वाचो ग्मिनिः १२४ अहं शुभयोर्युस् १४० इति द्वितीयः पादः ।

अथ तृतीयः पादः

प्राग्दिशो विभक्तिः १ किंसर्वनामबहुभ्योऽद्व्यादिभ्यः २ इदम इश् ३ एतेतौ रथोः ४ एतदोऽश् ५ पञ्चम्यास्तसिल् ७ पर्यभिभ्यां च ९ सप्तम्यास्त्रल् १०

इदमो हः ११ किमोऽत् १२ इतराभ्योऽपि दृश्यन्ते १४ सर्वैकान्यकिंयत्तदः काले दा १५ इदमोर्हिल् १६ दानीं च १८ अनद्यतनेर्हिलन्यतरस्याम् २१ सद्यः परुत्परार्य्यैषमः परेद्यवद्य पूर्वेद्युरन्येद्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः २२ प्रकारवचने थाल् २३ इदमस्थमुः २४ किमश्च २५ संख्यायाविधार्थे धा ४२ अतिशायनेतमबिष्ठनौ ५५ तिङश्च५६ द्विवचनविभज्योपपदे तरबीयसुनौ ५७ अजादी गुणवचनादेव ५८ प्रशस्यस्य श्रः६० ज्य च ६१ वृद्धस्य च ६२ अन्तिक बाढ़योर्नेदमसाधौ ६३ युवाल्पयोः कनन्यतरस्याम् विन्मतोर्लुक् ६५ प्रशंसायां रूपप् ६६ ईनसमासौ कल्पब्देश्यदेशीयरः ६७ प्रागिवात्क ७० अव्ययसर्वनाम्नामकच् प्राक्टेः ७१ अह्नाते ७३ कुत्सिते ७४ अवक्षेपणे कन् ९५ इवे प्रतिकृतौ ९६ इति तृतीयः पादः ॥५९५॥

अथ चतुर्थः पादः

किमेत्तिङव्ययघानाम्वद्रव्यप्रकर्षे ११ संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच् १७ द्वित्रिचतुर्भ्यः सुच् १८ बहुल्पार्थाच्छस् कारकादन्यतरस्याम् ४२ संख्यैकवचनाच्च वीप्सायाम् ४३ प्रतियोगे पञ्चम्यास्तसिः ४४ अपादाने चाहीयरुहोः ४५ अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः ५० विभाषा साति कात्स्न्यें ५२ तदधीनवचने च ५४ देये त्रा च ५५ समासान्ताः ६८ बहुव्रीहौ संख्येये डजबहुगणात् ७३ ऋक्पूरब्धूः पथामानक्षे ७४ अच्प्रत्यन्ववपूर्वात्सामलोम्नः७५ अदर्णोऽदर्शनात् ७६ अवसमन्धेभ्यस्तमसः ७९ तत् पुरुषस्याङ्गुलेः संख्याव्यादेः ८६ अहः सर्वैकदेशसंख्यातपुण्याच्च रात्रेः ८७ अन्होन्ह एतेभ्यः ८८ राजाहः सखिभ्यष्टच् ९१ द्वन्द्वाच्चुदषहान्तात्समाहारे १०६ अवययीभावे शरत्प्रभृतिभ्यः १०७ अनश्च १०८ ह्नयः

ङ् व्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ११३ धर्मादनिच् केवलात् १२४ उरःप्रभृतिभ्यः कप १५१ शेषाद्विभाषा १५४ इति पञ्चमाध्याये तुरीय पादः ॥६२५॥

अथ षष्ठाध्याये प्रथमः पादः

एकाचो द्वे प्रथमस्य १ अजादेर्द्वितीयस्य २ पूर्वोऽभ्यासः ४ उभे अभ्यस्तम् ५ जक्षित्यादयः षट् ६ लिटि धातोरनभ्यासस्य ८ सन्यङोः ९ श्लौ १० चङि ११ यङः सम्प्रसारणं पुत्रपत्योस्तत्पुरुषे १३ वचिस्वपियजादीनां किति १५ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च १६ लिट्यभ्यासस्योभयेषाम् १७ न संप्रसारणे सम्प्रसारणम् ३७ आदेच उपदेशेऽशिति ४५ क्रीङ्जीनां णौ ४८ सृजिदृशोर्झल्यमकिति ५८ अनुदात्तस्य चर्दुपधस्यान्यतरस्याम् ५९ धात्वादेः षः सः ६४ णो नः ६५ लोपो व्योर्वलि वेरपृक्तस्य ६७ हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल् ६८ एङ्ह्रस्वात्सम्बुद्धेः ६९ ह्रस्वस्य पिति कृति तुक् ७१ संहितायाम् ७२ छे च ७३ इको यणचि ७७ एचोऽयवायावः ७८ एकः पूर्वपरयोः ८४ आद्गुणः ८७ वृद्धिरेचि ८८ आटश्च ९० औतोऽम्शसोः ९३ एङि पररूपम् ९४ उस्यपदान्तात ९६ अतो गुणे ९७ अकः सवर्णे दीर्घः १०१ प्रथमयोः पूर्वसवर्णः १०२ तस्माच्छसो नः पुंसि १०३ नादिचि १०४ दीर्घाज्जसि च १०५ अमि पूर्वः १०७ सम्प्रसारणाच्च १०८ एङः पदान्तादति १०९ ङसिङसोश्च ११० ऋत उत् १११ ख्यत्यात्प

रस्य ११२ अतोरोरप्लुतादप्लुते ११३ हशिच११४ प्रकृत्याऽन्तःपादमव्यपरे ११५ प्लुतप्रगृह्या अचि नित्यम् १२५ एतत्तदोः सुलोपोऽकोरनञ्समासे हलि १३२ सुट् कात्पूर्वः १३५ अडभ्यासव्यवायेऽपि १३. सम्पर्युपेभ्यः करोतौ भूषणे १३७ समवायेच १३८ इति प्रथमः पादः ६८२

अथ षष्ठध्याये तृतीयः पादः

अलुगुत्तरपदे १ हलदन्तात्सप्तम्याः संज्ञायाम् ९ तत्पुरुषे कृति बहुलम् १४ आनङ् ऋतो द्वन्द्वे २५ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु ३४ तसिलादिष्वाकृत्वसुचः ३५ पुंवत्कर्मधारयजातीयदेशीयेषु ४२ आन्महतः समानाधिकरणजातीययोः ४६ द्व्यष्टनःसंख्यायामबहुव्रीह्यशीत्योः ४७ त्रेस्त्रयः ४८ इको ह्रस्वोऽङ्यो गालवस्य ६१ खित्यनव्ययस्य ६६ अरुर्द्विषदजन्तस्य मुम् ६७ नलोपो नञः ७३ तस्मान्नुडचि ७४ सहस्य सः संज्ञायाम् ७८ अव्ययीभावे चाकाले ८१ वोपसर्जनस्य ८२ समानस्य च्छन्दस्यमूर्धप्रभृत्युदर्केषु ८४ दृग्दृशवतुषु ८९ इदंकिमोरीश्की ९० आ सर्वनाम्नः ९१ पृषोदरादीनियथोपदिष्टम्१०९ ढ्रलोपे पूर्वस्य दीर्घोऽणः १११ सहिवहोरोदवर्णस्य ११२ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ११६ विश्वस्यवसुराटोः१२८ मित्रे चर्षौ १३० चौ १३८ सम्प्रसारणस्य १३९ इति तृतीयः पादः १२२

अथ षष्ठाध्याये चतुर्थः पादः

अङ्गस्य १ हलः २ नामि ३ न तिसृचतसृ ४ छन्दस्युभयथा ५ नृचापधायाः ६ सर्वनामस्थाने, चासम्बुद्धौ ८ सान्तमहत संयोगस्य अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृ होतृपोतृप्रशास्तृणाम् ११ इन् हन्पूषार्य्यम्णां शौ १२ सौ च १३ अत्वसन्तस्य चाधातोः १४ अनुनासिकस्य

किझलोः क्ङिति १५ अज्झनगमां सनि १६ तनोतेर्विभाषा १७ असिद्धवदत्राभात् २२ श्नान्नलोपः २३ अनिदितां हलउपधायाः क्ङिति २४ दंशसञ्जस्वञ्जां शपि २५ रंजेश्च २६ घञि च भावकरणयोः २७ शासइदङ्हलोः ३४ शा हौ ३५ हन्तेर्जः ३६ अनुदात्तोपदेशवनतितनोत्यादी - नामनुनासिकलोपझलिक्ङितिपो ३७ विड्वनोरनुनासिकस्यात् ४१ जनसनखनां सञ्झलोः ४२ ये विभाषा ४३ तनोतेर्यकि ४४ आर्द्धधातुके ४६ अतो लोपः ४८ यस्य हलः ४९ णेरनिटि ५१ निष्ठायां सेटि५२ अयामन्ताल्वाय्येन्त्विष्णुषु ५५ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च ६२ दीङो युडचि क्ङिति ६३ लोप इटि च ईर्यति ६५ घुमास्थागापाजहातिसां हलि ६६ एर्लिङि ६७ वान्यस्य संयोगादेः ६८ न ल्यपि ६९ लुङ्लङ्लुङ्क्ष्वडुदात्तः ७० आडजादीनाम् ७२ न माङ्योगे ७४ अचि श्नुधातुभ्रुवां य्वोरियङुवङौ ७७ अभ्यासस्यासवर्णे ७८ स्त्रियाः ७९ वामशसोः ८० इणो यण् ८१ एरनेकाचोऽसंयोगपूर्वस्य ८२ ओः सुपिः ८३ हुश्नुवोः सार्वधातुके ८७ भुवो वुग्लुङ्लिटोः ८८ ऊदुपधाया गोहः ८९ मितां ह्रस्वः ९२ गमहनजनखनघसां लोपः क्ङित्यनङि ९८ हुझल्भ्यो हेर्धिः १०१ चिणो लुक् १०४ उतश्च प्रत्ययादसंयोगपूर्वात्१०६ लोपश्चास्यान्यतरस्यां म्वोः१०७ करोतेः १०८ येच १०९ अत उत् सार्वधातुके ११० श्नसोरल्लोपः १११ श्नाभ्यस्तयोरातः ११२ ई हल्यघोः ११३ इदरिद्रस्य ११४ भियोऽन्यतरस्याम् ११५ जहातेश्च ११६ आ च हौ ११७ लोपो यि ११८ ध्वसोरेद्धावभ्यासलोपश्च१९ एतआतोएकहल्मध्येऽनादेशादेर्लिटि १२० थलि च सेटि १२१ तृफलभजत्रपश्च १२२ वा जृभ्रमुत्रसाम् १२४ न शसददवादिगुणानाम् १२६ भस्य १२५ वसोसंप्रसारण १३१

वाह ऊठ् ॥ १३२ ॥ श्वयुवमघोनामतद्धिते ॥ १३३ ॥ अल्लोपोऽनः ॥१३४॥ विभाषा ङिश्योः ॥ १३६ ॥ न संयोगाद्वमन्तात् ॥ १३७ ॥ अचः ॥ १३८ ॥ उद ईत् ॥ १३९ ॥ आतो धातोः ॥ १४० ॥ तिविंशतेर्डिति ॥ १४२ ॥ टेः ॥ १४३ ॥ नस्तद्धिते ॥ १४४ ॥ अह्नष्टखोरेव ॥ १४५ ॥ ओर्गुणः ॥ १४६ ॥ ढे लोपोऽकद्र्वाः ॥ १४७ ॥ यस्येति च ॥ १४८ ॥ हलस्तद्धितस्य ॥१५०॥ तुरिष्ठेमेयस्सु ॥ १५४ ॥ टेः ॥ १५५ ॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां यणादिपरं पूर्वस्य च गुणः ॥ १५६ ॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां प्रस्थस्फवर्बंहिगर्वर्षित्रपद्राघिवृन्दाः ॥ १५७ ॥ बहोर्लोपो भू च बहोः ॥ १५८ ॥ इष्ठस्य यिट् च ॥ १५९ ॥ ज्यादादीयसः ॥ १६० ॥ र ऋतो हलादेर्लघोः ॥ १६१ ॥ प्रकृत्यैकाच् ॥ १६२ ॥ इनण्यनपत्ये ॥ १६४ ॥ अन् ॥ १६७ ॥ ये चाभावकर्मणोः ॥ १६८ ॥ आत्माध्वानौ खे ॥ १६९ ॥ ब्राह्मोऽजातौ ॥ १७१ ॥ इति षष्ठाध्याये चतुर्थः पादः ॥ ८२१ ॥

अथ सप्तमाध्याये प्रथमः पादः

युवोरनाकौ ॥ १ ॥ प्रत्ययादीनाम् ॥ २ ॥ झोऽन्तः ॥ ३ ॥ अदभ्यस्तात् ॥ ४ ॥ आत्मनेपदेष्वनतः ॥ ५ ॥ शीङो रुट् ॥ ६ ॥ अतो भिस ऐस् ॥ ९ ॥ नेदमदसोरकोः ॥ ११ ॥ टाङसिङसामिनात्स्याः ॥ १२ ॥ ङेर्यः ॥ १३ ॥ सर्वनाम्नः स्मै ॥ १४ ॥ ङसिङ्योः स्मात्स्मिनौ ॥ १५ ॥ जसः शी ॥ १७ ॥ औङ आपः ॥ १८ ॥ नपुंसकाच्च ॥ १९ ॥ जश्शसोः शिः ॥ २० ॥ अष्टाभ्य औश् ॥ २१ ॥ षड्भ्यो लुक् ॥ २२ ॥ स्वमोर्नपुंसकात् ॥ २३ ॥ अतोऽम् ॥ २४ ॥ अद्ड्डतरादिभ्यः पञ्चभ्यः ॥ २५ ॥ युस्मदस्मद्भ्यां ङसोऽश् ॥ २७ ॥ ङे प्रथमयोरम् ॥ २८ ॥ शसो न ॥ २९ ॥

भ्यसो भ्यम् ॥ ३० ॥ पञ्चम्या अत् ॥ ३१ ॥ एकवचनस्य च ॥ ३२ ॥ साम आकम् ॥ ३३ ॥ आत औ णलः ॥ ३४ ॥ तुह्योस्तातङ्ङाशिष्यन्यतरस्याम् ॥ ३५ ॥ विदेः शतुर्वसुः ॥३६॥ समासेऽनञ्पूर्वे क्त्वो ल्यप् ॥ ३७ ॥ आज्जसेरसुक् ॥ ५० ॥ आमि सर्वनाम्नः सुट् ॥ ५२ ॥ त्रेस्त्रयः ॥ ५३ ॥ ह्रस्वनद्यापो नुट् ॥ ५४ ॥ षट् चतुर्भ्यश्च ॥ ५५ ॥ इदितो नुम् धातोः ॥ ५८ ॥ शे मुचादीनाम् ॥ ५९ ॥ मस्जिनशोर्झलि ॥ ६० ॥ उगिदचां सर्वनामस्थानेऽधातोः ॥ ७० ॥ नपुंसकस्य झलचः ॥ ७२ ॥ इकोऽचि विभक्तौ ॥ ७३ ॥ तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ॥ ७४ ॥ अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ॥ ७५ ॥ नाभ्यस्ताच्छतुः ॥७८॥ वा नपुंसकस्य ॥ ७९ ॥ आच्छीनद्योर्नुम् ॥ ८० ॥ श्यप्श्यनोर्नित्यम् ॥ ८१ ॥ सावनडुहः ॥ ८२ ॥ पथिमथ्यृभुक्षामात् इतोऽत् सर्वनामस्थाने ॥ ८६ ॥ थोन्थः ॥ ८७ ॥ भस्य टेर्लोपः ॥ ८८ ॥ पुंसोऽसुङ् ॥ ८९ ॥ गोतो णित् ॥ ९० ॥ णलुत्तमो वा ॥ ९१ ॥ सख्युरसम्बुद्धौ ॥ ९२ ॥ अनङ् सौ ॥ ९३ ॥ ऋदुशनस्पुरुदंसोऽनेहसाञ्च ॥९४ चतुरनडुहोरामुदात्तः ॥ ९८ ॥ अम् संबुद्धौ ॥ ९९ ॥ ऋत इद्धातोः ॥ १०० ॥ उपधायाश्च ॥१०१॥ उदोष्ठ्यपूर्वस्य ॥१०२॥ इति प्रथमः पादः

अथ सप्तमाध्याये द्वितीयः पादः

सिचि वृद्धिः परस्मैपदेषु ॥ १ ॥ वदव्रजहलन्तस्याचः ॥ ३ ॥ नेटि ॥ ४ ॥ ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ॥ ५ ॥ ऊर्णोतेर्विभाषा ॥ ६ ॥ अतो हलादेर्लघोः ॥ ७ ॥ नेड्वशिकृति ॥ ८ ॥ तितुत्रतथसिसुसरकसेषु च ॥ ९ ॥ एकाच उपदेशेऽनुदात्तात् ॥१०॥ श्र्युकः किति॥११॥ सनि ग्रहगुहोश्च ॥ १२ ॥ कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि ॥ १३ ॥

श्वीदितो निष्ठायाम् ॥ १४ ॥ यस्य विभाषा ॥ १५ ॥ आदितश्च ॥ १६ ॥ आर्धधातुकस्येड् वलादेः ॥ ३५ ॥ ग्रहोऽलिटि दीर्घः ॥ ३७ ॥ वृतो वा ॥ ३८ ॥ न लिङि ॥ ३९ ॥ सिचि च परस्मैपदेषु ॥ ४० ॥ इट् सनि वा ॥ ४१ ॥ लिङ्सिचोरात्मनेपदेषु ॥ ४२ ॥ ऋतश्च संयोगादेः ॥ ४३ ॥ स्वरतिसूतिसूयतिधूञूदितो वा ॥ ४४ ॥ रधादिभ्यश्च ॥ ४५ ॥ तीषसहलुभरुषरिषः ॥४८॥ जृव्रश्च्योः क्त्वि ॥ ५५ ॥ उदितो वा ॥ ५३ ॥ सेऽसिचि कृतचृतच्छृदतृदनृतः ॥ ५७ ॥ गमेरिट् परस्मैपदेषु ॥ ५८ ॥ न वृद्भ्यश्चतुर्भ्यः ॥ ५९ ॥ तासि च क्लृपः ॥ ६० ॥ अचस्तास्वत्थल्यनिटो नित्यम् ॥ ६१ ॥ उपदेशेऽत्वतः ॥ ६२ ॥ ऋतो भारद्वाजस्य ॥ ६३ ॥ विभाषासृजिदृशोः ॥ ६५ ॥ इडत्त्यर्तिव्ययतीनाम् ॥७०॥ ऋद्धनोः स्ये ॥७०॥ अञ्जेः सिचि ॥ ७१ ॥ स्तुसुधूञ्भ्यः परस्मैपदेषु ॥ ७२ ॥ यमरमनमातां सक् च ॥ ७३ ॥ रुदादिभ्यः सार्वधातुके ॥ ७६ ॥ ईशः से ॥ ७७ ॥ ईडजनोर्ध्वे च ॥ ७८ ॥ लिङः सलोपोऽनन्त्यस्य ॥ ७९ ॥ अतो येयः ॥ ८० ॥ आतो ङितः ॥ ८१ ॥ आने मुक् ॥ ८२ ॥ ईदासः ॥ ८३ ॥ अष्टन आ विभक्तौ ॥ ८४ ॥ रायो हलि ॥ ८५ ॥ युष्मदस्मदोरनादेशे ॥ ८६ ॥ द्वितीयायाञ्च ॥८७॥ प्रथमायाश्च द्विवचने भाषायाम् ॥ ८८ ॥ योऽचि ॥ ८९ ॥ शेषे लोपः ॥ ९० ॥ मपर्यन्तस्य ॥ ९१ ॥ युवावौ द्विवचने ॥ ९२ यूयवयौ जसि ॥ ९३ ॥ त्वाहौ सौ ॥ ९४ ॥ तुभ्यमह्यौ ङयि ॥९५॥ तवममौ ङसि ॥ ९६ ॥ त्वमावेकवचने ॥ ९७ ॥ प्रत्ययोत्तरपदयोश्च ॥ ९८ ॥ त्रिचतुरोः स्त्रियां तिसृचतसृ ॥ ९९ ॥ अचि र ऋतः ॥ १०० ॥ त्यदादीनामः ॥ १०२ ॥ किमः कः ॥ १०३ ॥ कु तिहोः ॥१०४॥ क्वाति॥१०५॥तदोः सः

सावनन्त्ययोः ॥ १०६ ॥ अदस औ सुलोपश्च ॥१०७॥ इदमो मः ॥ १०८ ॥ दश्च ॥ १०९ ॥ यः सौ ॥ ११० ॥ इदोऽय् पुंसि ॥ १११ ॥ अनाप्यकः ॥ ११२ ॥ हलि लोपः ॥ ११३ ॥ मृजेर्वृद्धिः ॥ ११४ ॥ अचोञ्णिति ॥११५॥ अत उपधायाः ॥ ११६ ॥ तद्धितेष्वचामादेः ॥ ११७ ॥ किति च ॥ ११८ ॥ इति द्वितीयः पादः ॥ ९६३ ॥

अथ सप्तमाध्याये तृतीयः पादः

न य्वाभ्यां पदान्ताभ्यां पूर्वौ तु ताभ्यामैच् ॥ ३ ॥ द्वारादीनां च ॥ ४ ॥ उत्तरपदस्य ॥१०॥ हृद्भगसिन्ध्वन्ते पूर्वपदस्य च ॥ १९ ॥ अनुशतिकादीनाञ्च ॥२०॥ हनस्तोऽचिण्णलोः ।३२। आतोयुक् चिण्कृतोः ॥३३॥ नोदात्तोपदेशस्यमान्तस्यानाचमेः।३४। जनिवध्योश्च ॥३५॥ अर्त्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ ॥३६॥ भियोहेतुभये षुक् ॥ ४०॥ प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः ॥ ४४ ॥ ठस्येकः ॥५०॥ इसुसुक्तान्तात्कः ॥५१॥ चजोः कु घिण्यतोः ॥५२॥ हो हन्तेर्ञ्णिन्नेषु ॥ ५४ ॥ अभ्यासाच्च ॥५५॥ सन्लिटोर्जेः ॥५७॥ विभाषा चेः ॥५८ घोर्लोपो लेटि वा ॥७०॥ ओतः श्यनि ॥७१॥ क्सस्याचि ॥७२॥ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ॥७३॥ शमामष्टानां दीर्घः श्यनि ७४॥ ष्ठिवुक्लम्याचमां शिति ॥७५ क्रमः परस्मैपदेषु ॥७६॥ इषुगमियमां छः ॥७७॥ पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः ॥७८॥ ज्ञाजनोर्जा ॥७९॥ प्वादीनां ह्रस्वः ॥८०॥ मिदेर्गुणः ॥८२॥ जुसि च ॥८३॥ सार्वधातुकार्धधातुकयोः ॥८४॥ जाग्रोऽविचिण्णल्ङित्सु ॥८५॥ पुगन्तलघूपधस्य च ॥८६॥ नाभ्यस्तस्याचि पिति सार्वधातुके ॥८७॥ भूसुवोस्तिङि ॥८८॥ उतो वृद्धिर्लुकि हलि

॥८६॥ ब्रुव ईट् ॥९३॥ यङो वा ॥९४॥ तुरुस्तुशम्यमः सार्वधातुके ॥९५॥ अस्तिसिचोऽपृक्ते ॥९६॥ रुदश्च पञ्चभ्यः ॥९८॥ अड् गार्ग्यगालवयोः ॥९९॥ अदः सर्वेषाम् ॥१००॥ अतो दीर्घो यञि ॥ ०१॥ सुपि च ॥१०२॥ बहुवचने झल्येत् १०३ ओसि च ॥१०४॥ आङि चापः ॥१०५॥ सम्बुद्धौ च ॥१०६॥ अम्बार्थनद्योर्ह्रस्वः ॥०७॥ ह्रस्वस्य गुणः ॥१०८॥ जसि च ॥१०९॥ ऋतो ङिसर्वनामस्थानयोः ॥११०॥ घेर्ङिति ॥१ १॥ आण्नद्याः ॥११२॥ याडापः ॥११३॥ सर्वनाम्नः स्याड् ह्रस्वश्च ।११४। ङेराम्नद्यामीभ्यः ।११६। इदुद्भ्याम् ॥११७॥ औत् ॥११८ अच्च घेः ॥११९॥ आङो नाऽस्त्रियाम् ॥१२०॥ इति तृतीयः पादः

अथ चतुर्थः पादः

णौ चङ्युपधाया ह्रस्वः ॥१॥ नाग्लोपिशास्वृदिताम् ॥२॥ तिष्ठतेरित् ॥५॥ उर्ऋत् ॥७॥ दयतेर्दिगि लिटि ॥९॥ ऋतश्च संयोगादेर्गुणः ॥१०॥ ऋच्छत्यृताम् ॥११॥ शृदृप्रां ह्रस्वो वा ॥१२॥ केऽणः ॥१३॥ न कपि ॥१४॥ ऋदृशोऽङि गुणः ॥१६॥ अस्यतेस्तुक् ॥१७॥ श्वयतेरः ॥१८॥ पतः पुम् ॥१९॥ वच उम् ।२०। शीङः सार्वधातुके गुणः ॥२१॥ अयङ् यि ङिति ॥२२॥ अकृत्सार्वधातुकयोर्दीर्घः ॥२५॥ च्वौ च ॥२६॥ रीङ् ऋतः ॥२७॥ रिङ् शयग् लिङ्क्षु ॥२८॥ गुणोऽर्तिसंयोगाद्योः ॥२९॥ यङि च ॥३०॥ ई घ्राध्मोः ॥३१॥ अस्य च्वौ ॥३२॥ क्यचि च ॥३३॥ यति स्यतिमास्थामित्ति किति ॥४० दधातेर्हिः ॥४२॥ जहातेश्च क्त्वि ॥४३॥ दो दद् घोः ॥४६॥ अचउपसर्गात्तः ॥४७॥ अपो भि ॥४८॥ सः स्यार्धधातुके ॥४९॥ तासस्त्योर्लोपः ॥५०॥ रि च ॥५१॥ ह एति ॥५२॥ सनि मीमाघुरभलभशकपतपदामच इस् ॥५४॥ आप्ज्ञाप्यृधामीत् ॥५५॥ अत्र लोपोऽभ्यासस्य

॥५८॥ ह्रस्वः ॥५९॥ हलादिः शेषः ॥६०॥ शर्पूर्वाः खयः ॥६१ कुहोश्चुः ॥६२॥ उरत् ॥६६॥ द्युतिस्वाप्योः सम्प्रसारणम्॥६७॥ व्यथो लिटि ॥६८॥ दीर्घ इणः किति ॥६९॥ अत आदेः ॥७०॥ तस्मान्नुड् द्विहलः ॥७१॥ अश्नोतेश्च ॥७२॥ भवतेरः ॥७३॥ निजां त्रयाणां गुणः श्लौ ॥७५॥ भृञामित् ॥७६॥ अतिपिपर्त्योश्च ॥७७॥ सन्यतः ॥७९॥ ओः पुयण्ज्यपरे ॥८०॥ स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनांवा ॥८१॥ गुणो यङ्लुकोः ॥८२॥ दीर्घोऽकितः ॥८३॥ रीगृदुपधस्य च ॥९०॥ रुग्रिकौ च लुकि ॥९१॥ ऋतश्च ॥९२॥ सन्वल्लघुनि चङ्परेऽनग्लोपे ॥९३॥ दीर्घो लघोः ॥९४॥ ईच गणः ॥५॥ इति सप्तमाध्याये चतुर्थः पादः ॥१०८४॥

———

अथ अष्टमाध्याय प्रथमः पादः

सर्वस्य द्वे ॥१॥ तस्यपरमाम्रेडितम्॥२ नित्यवीप्सयोः ॥ ४ ॥ पदस्य ॥१६॥ पदात् ॥१७॥ अनुदात्तं सर्वमपादादौ ॥१८॥ युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वान्नावौ ॥२०॥ बहुवचनस्य वस्नसौ ॥२१॥ तेमयावेकवचनस्य ॥२२॥ त्वामौ द्वितीयायाः ॥२३॥ न च वाहाहैवयुक्ते ॥२४॥ इति प्रथमः पादः ॥१०९४॥

अथ द्वितीयः पादः

पूर्वत्रासिद्धम् ॥१॥ नलोपः सुप् स्वरसंज्ञातुग्विधिषु कृति ॥२॥ न मुने ॥३॥ न लोपः प्रातिपदिकान्तस्य ॥७॥ न ङिसम्बुद्ध्योः ।८।मादुपधायाश्च मतोर्वोऽयवादिभ्यः ॥९॥ झयः ॥१०॥ कुपो रो लः ॥१८॥ उपसर्गस्यायतौ ॥९॥ संयोगान्तस्य लोपः ॥२३॥ रात्सस्य ॥२४॥ धि च ॥२५॥ झलो झलि ॥२६॥ ह्रस्वा-

दङ्गात् ॥२७॥ इट ईटि ॥२८॥ स्कोः संयोगाद्योरन्ते च ॥२९॥ चोः कुः ॥३०॥ हो ढः ॥३१॥ दादेर्धातोर्घः ॥३२॥ वा द्रुहमुहष्णुहष्णिहाम् ॥३३॥ नहो धः॥३४॥ आहस्थः ॥३५॥ ब्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः ॥३६॥ एकाचो बशो भष् झषन्तस्य स्ध्वोः ॥३७॥ दधस्तथोश्च ॥३८॥ झलां जशोऽन्ते ॥३९॥ झषस्तथोर्धोऽधः ॥४०॥ षढोः कः सि ॥४१॥ रदाभ्यां निष्ठातो नः पूर्वस्य च दः ॥४२॥ संयोगादेरातो धातोर्यण्वतः ॥४३॥ ल्वादिभ्यः ॥४४॥ ओदितश्च ॥४५॥ शुषः कः ॥५१॥ पचो वः ॥५२॥ क्षायो मः ॥५३॥ क्किन्प्रत्ययस्य कुः ॥६२॥ मोनोधातोः ॥६४॥ म्वोश्च ॥६५॥ ससजुषो रुः ॥ ६६ ॥ अहन् ॥ ६८ ॥ रोऽसुपि ॥ ६९ ॥ वसुस्रंसुध्वंस्वनडुहां दः ॥ ७२ ॥ तिप्यनस्तेः ॥ ७३ ॥ सिपि धातो रुर्वा ॥ ७४ दश्च ॥ ७५ ॥ र्वोरुपधाया दीर्घ इकः ॥ ७६ ॥ हलि च ॥ ७७ ॥ उपधायाश्च ॥ ७८ ॥ न भकुर्छुराम् ॥७९॥ अदसोऽसेर्दादुदो मः ॥ ८० ॥ एत ईद् बहुवचने ॥ ८१ ॥

इति द्वितीयःपादः ॥ ११४३ ॥

अथ तृतीयः पादः

❀ मतुवसो रु सम्बुद्धौ छन्दसि ॥ १ ॥ अत्रानुनासिकः पूर्वस्य तु वा ॥ २ ॥ समः सुटि ॥ ५ ॥ पुमः खय्यम्परे ॥ ६ ॥ नश्छव्यप्रशान् ॥ ७ ॥ ढो ढे लोपः ॥ १३ ॥ रो रि ॥ १४ ॥ खरवसानयोर्विसर्जनीयः ॥ १५ ॥ रोः सुपि ॥ १६ ॥ भो भगोअघोअपूर्वस्य योऽशि ॥ १७ ॥ व्योर्लघुप्रयत्नतरः शाकटायनस्य ॥ १८ ॥ लोपः शाकल्यस्य ॥ १९ ॥ हलि सर्वेषाम् ॥ २२ ॥ मोऽनुस्वारः ॥२३॥ नश्चापदान्तस्य झलि ॥ २४ ॥ ङमो ह्रस्वादचि ङमुण्नित्यम् ॥२२॥ विसर्जनीयस्य सः ॥ ३४ ॥

कुप्वो: क: पौच ।३७। अपादान्तस्य मूर्धन्य: ।५५। सहे: साढ: स: ।५६। इण्को: ।५७। नुम्विसर्जनीयशव्यवायेऽपि ।५८। अ देशप्रत्यययो: शासिवसिघसीनाञ्च ।६०। इण: षीध्वं लुङ्लिटां धोऽङ्गात् ।७८। विभाषेटः ।७९। इति तृतीयः पादः ।११६८।

अथ चतुर्थः पादः

रषाभ्यां नो णः समानपदे ।१। अट्कुप्वाङ्नुम्व्यवायेऽपि उपसर्गादसमासेऽपि णोपदेशस्य ।१४। स्तोः श्चुना श्चुः ।४०। ष्टुना ष्टुः ।४१। यरोऽनुनासिकेऽनुनासिको वा ।४५। झलां जश् झशि ।५३। अभ्यासे चर्च ।५४। खरि च ।५५। वाऽवसाने ।५६। अनुस्वारस्य ययि परसवर्णः वा पदान्तस्य ।५९। तोर्लि ॥६०॥ उदः स्थास्तम्भोः पूर्वस्य ॥६१॥ झयो होऽन्यतरस्याम् ।६२। शश्छोऽटि ।६३। हलो यमां यमि लोपः ।.४। झरो झरि सवर्णे ।६५। अ अ इति ।६८। इत्यष्टमाध्याये चतुर्थः पादः ।११८७।

———

अधीत्य बालाः सुधियो भवेयुः स्वल्पप्रयासादृजुपद्धतेश्च ।
अस्तं व्रजेद् व्याकृतिभीतिलेशः प्रसीदतां नः स महाविभूतिः ॥

———

इति श्रीविहारप्रान्तीयसारण्यमण्डलस्थजगन्नाथपुराभिजनेन
काशीवास्तव्येन महामहाध्यापकेन पण्डितराज-
श्रीगोपालशास्त्रिणा दर्शनकेशरिणा
क्षैमधरिणा रचिता
संक्षिप्ताष्टाध्यायी
समाप्ता ।

भारतीय संस्कृति संरक्षक शास्त्रिमण्डलकी अमूल्य पुस्तकें—

(१)	धर्मोपदेशिका	III)
(२)	हिन्दीदीपिका	१)
(३)	संक्षिप्तहितोपदेश	II)
(४)	संस्कृतशिक्षक	१।)
(५)	भारतीयसंस्कृति	१)
(६)	ऋजुपाणिनीयम्	II)
(७)	मीमांसापरिभाषा	III)
(८)	पाणिनीयप्रबोध प्रथम भाग	१)
(९)	,, ,, द्वितीय भाग	१)
(१०)	कथा-मञ्जरी (हिन्दी	१II)
(११)	वाणी निबन्धमणिमाला (संस्कृतम्)	III)
(१२)	वज्रपातः (संस्कृत जीवनकाव्य)	II=)
(१३)	संस्कृतम् (प्रथमं शतकम्),	II)
	संस्कृतम् (द्वितीयं शतकम्	II)
(१४)	स्वातन्त्र्य सन्देशः-(संस्कृतम्)	I=)
(१५)	संस्कृत पत्रावली	II=)
(१६)	वेंकटेश्वरतारावली (लघुस्तोत्र पुस्तकम्)	=)
(१७)	तर्कसंग्रह (हिन्दीके साथ)	I)

प्राप्तिस्थानः—

व्यवस्थापक, शास्त्रिमण्डल,

डी. ५९।३१ गार्डन कालोनी, सिगरा, बनारस १